# shrIpa nchamukhivIrahanUmatkavacham

# શ્રીપઞ્ચમુખિવીરહનૂમત્કવચમ્

## Document Information

Text title : panchamukhivIrahanUmatkavacham (Alternative)

File name : panchamukhivIrahanUmatkavacham.itx

Category : kavacha, hanumaana, bIjAdyAkSharamantrAtmaka

Location : doc_hanumaana

Transliterated by : Shri Devi Kumar, refined by PSA Easwaran

Proofread by : PSA Easwaran

Description-comments : From Hanumatstutimanjari, Mahaperiaval Publication

Acknowledge-Permission: Mahaperiyaval Trust

Latest update : May 1, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 13, 2023

*sanskritdocuments.org*

# શ્રીપઞ્ચમુખિવીરહનૂમત્કવચમ્

(સુદર્શનસંહિતાતઃ ।)

અસ્ય શ્રીપઞ્ચમુખિવીરહનૂમત્કવચસ્તોત્રમહામન્ત્રસ્ય
બ્રહ્મા ઋષિઃ । ગાયત્રી છન્દઃ ।
પઞ્ચમુખ્યન્તર્ગતઃ શ્રીરામરૂપી પરમાત્મા દેવતા ।
રાં બીજમ્ । મં શક્તિઃ । ચન્દ્ર ઇતિ કીલકમ્ ।
પઞ્ચમુખ્યન્તર્ગત શ્રીરામરૂપિપરમાત્મપ્રસાદસિદ્ધ્યર્થે
મમ સર્વાભીષ્ટસિદ્ધ્યર્થે જપે વિનિયોગઃ ।

રાં અઙ્ગુષ્ઠાભ્યાં નમઃ ।
રીં તર્જનીભ્યાં નમઃ ।
રૂં મધ્યમાભ્યાં નમઃ ।
રૈં અનામિકાભ્યાં નમઃ ।
રૌં કનિષ્ઠિકાભ્યાં નમઃ ।
રઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ।

રાં હૃદયાય નમઃ ।
રીં શિરસે સ્વાહા ।
રૂં શિખાયૈ વષટ્ ।
રૈં કવચાય હુમ્ ।
રૌં નેત્રાભ્યાં વૌષટ્ ।
રઃ અસ્ત્રાય ફટ્ । ભૂર્ભુવસ્સુવરોમ્ ॥

(ઇતિ દિગ્બન્ધઃ)

અથ ધ્યાનમ્
વન્દે વાનરનારસિંહખગરાટ્ક્રોડાશ્વવક્ત્રાન્વિતં
દિવ્યાલઙ્કરણં ત્રિપઞ્ચનયનં દેદીપ્યમાનં રુચા ।
હસ્તાબ્જૈરસિખેટપુસ્તકસુધાકુમ્ભાઙ્કુશાદીન્ હલાન્

ખટ્વાઙ્ગં ફણિભૂરુહં દશભુજં સર્વારિદર્પાપહમ્ ॥

ઈશ્વર ઉવાચ

અથ ધ્યાનં પ્રવક્ષ્યામિ શ઼ૃણુ સર્વાઙ્ગસુન્દરિ ।
યત્કૃતં દેવદેવેશિ ધ્યાનં હનુમતઃ પરમ્ ॥ ૧॥

પઞ્ચવક્ત્રં મહાભીમં ત્રિપઞ્ચનયનૈર્યુતમ્ ।
બાહુભિર્દશભિર્યુક્તં સર્વકામાર્થસિદ્ધિદમ્ ॥ ૨॥

પૂર્વં તુ વાનરં વક્ત્રં કોટિસૂર્યસમપ્રભમ્ ।
દંષ્ટ્રાકરાલવદનં ભ્રુકુટીકુટિલેક્ષણમ્ ॥ ૩॥

અન્યત્તુ દક્ષિણં વક્ત્રં નારસિંહં મહાદ્ભુતમ્ ।
અત્યુગ્રતેજોજ્વલિતં ભીષણં ભયનાશનમ્ ॥ ૪॥

પશ્ચિમં ગારુડં વક્ત્રં વજ્રકુણ્ડં મહાબલમ્ ।
સર્વનાગપ્રશમનં વિષભૂતાદિકૃન્તનમ્ ॥ ૫॥

ઉત્તરં સૌકરં વક્ત્રં કૃષ્ણં દીપ્તં મહોજ્જ્વલમ્ ।
પાતાલસિદ્ધિવેતાલજ્વરરોગાદિકૃન્તનમ્ ॥ ૬॥

ઊર્ધ્વં હયાનનં ઘોરં દાનવાન્તકરં પરમ્ ।
એતત્પઞ્ચમુખં તસ્ય ધ્યાયતામભયઙ્કરમ્ ॥

ખડ્ગં ત્રિશૂલં ખટ્વાઙ્ગં પાશાઙ્કુશસુપર્વતમ્ ।
મુષ્ટિદ્રુમગદાભિન્દિપાલજ્ઞાનેન સંયુતમ્ ॥ ૮॥

એતાન્યાયુધજાલાનિ ધારયન્તં યજામહે ।
પ્રેતાસનોપવિષ્ટં તુ સર્વાભરણભૂષિતમ્ ॥ ૯॥

દિવ્યમાલામ્બરધરં દિવ્યગન્ધાનુલેપનમ્ ।
સર્વાશ્ચર્યમયં દેવમનન્તં વિશ્વતોમુખમ્ ॥ ૧૦॥

પઞ્ચાસ્યમચ્યુતમનેકવિચિત્રવીર્યં
શ્રીશઙ્ખચક્રરમણીયભુજાગ્રદેશમ્ ।
પીતામ્બરં મકુટકુણ્ડલનૂપુરાઙ્ગં
ઉદ્યોતિતં કપિવરં હૃદિ ભાવયામિ ॥ ૧૧॥

મર્કટેશ મહોત્સાહ સર્વશોકવિનાશક ।
શત્રૂન્ સંહર માં રક્ષ શ્રિયં દાપય મે પ્રભો ॥ ૧૨॥

હરિમર્કટમર્કટમન્ત્રમિમં પરિલિખ્યતિ લિખ્યતિ ભૂમિતલે ।
યદિ નશ્યતિ નશ્યતિ શત્રુકુલં યદિ મુઞ્ચતિ મુઞ્ચતિ વામકરઃ ॥ ૧૩॥

ઇતિ ધ્યાનમ્

શ્રીપઞ્ચમુખહનુમત્કવચસ્તોત્રમહામન્ત્રપઠનં કરિષ્યે

ૐ હરિમર્કટમહામર્કટાય ૐ વં વં વં વં વં વં ફટ્ ફે ફે સ્વાહા ।
ૐ હરિમર્કટમહામર્કટાય ૐ ઘં ઘં ઘં ઘં ઘં ઘં ફટ્ ફે ફે સ્વાહા ।
ૐ હરિમર્કટમહામર્કટાય ૐ ખેં ખેં ખેં ખેં ખેં ખેં ફટ્ ફે ફે
મારણાય સ્વાહા ।
ૐ હરિમર્કટમર્કટાય ૐ ઠં ઠં ઠં ઠં ઠં ઠં ફટ્ ફે ફે
સ્તમ્ભનાય સ્વાહા ।
ૐ હરિમર્કટમર્કટાય ૐ ૐ ૐ ૐ ૐ ૐ ફટ્ ફે ફે આકર્ષણસત્વકાય સ્વાહા ।

ૐ હરિમર્કટમર્કટમન્ત્રમિદં
પરિલિખ્યતિ લિખ્યતિ ભૂમિતલે ।
યદિ નશ્યતિ નશ્યતિ વામકરે
પરિમુઞ્ચતિ મુઞ્ચતિ શૃઙ્ખલિકા ।
ૐ નમો ભગવતે પઞ્ચવદનાય પૂર્વે કપિમુખાય શ્રીવીરહનૂમતે
ૐ ટં ટં ટં ટં ટં ટં
સકલશત્રુસંહારાય હું ફટ્ ફે ફે ફે ફે ફે ફે સ્વાહા ।
ૐ નમો ભગવતે શ્રીપઞ્ચવદનાય દક્ષિણે
કરાલવદન શ્રીનૃસિંહમુખાય
શ્રીવીરહનૂમતે ૐ હં હં હં હં હં હં સકલ ભૂતપ્રેતદમનાય
મહાબલાય હું ફટ્ ફે ફે ફે ફે ફે ફે સ્વાહા ।
ૐ નમો ભગવતે પઞ્ચવદનાય પશ્ચિમે ગરુડમુખાય
શ્રીવીરહનૂમતે ૐ મં મં મં મં મં મં મહારુદ્રાય
સકલરોગવિષપરિહારાય
હું ફટ્ ફે ફે ફે ફે ફે ફે સ્વાહા ।
ૐ નમો ભગવતે પઞ્ચવદનાય ઉત્તરે આદિવરાહમુખાય શ્રીવીરહનૂમતે
ૐ લં લં લં લં લં લં લક્ષ્મણપ્રાણદાત્રે લઙ્કાપુરીદાહનાય
સકલસમ્પત્કરાય પુત્રપૌત્રાદ્યભિવૃદ્ધિકરાય ૐ નમઃ સ્વાહા ।
ૐ નમો ભગવતે પઞ્ચવદનાય ઊર્ધ્વમુખસ્થિતહયગ્રીવમુખાય

શ્રીવીરહનૂમતે ૐ રું રું રું રું રું રું રુદ્રમૂર્તયે સકલલોકવશીકરાય
વેદવિદ્યાસ્વરૂપિણે । ૐ નમઃ સ્વાહા ।
(ઇતિ મૂલમન્ત્રઃ । બીજમુદ્રાઃ પ્રદર્શયેત્)

ૐ કં ખં ગં ઘં ઙં ચં છં જં ઝં ઞં ટં ઠં ડં ઢં ણં
તં થં દં ધં નં પં ફં બં ભં મં યં રં લં વં શં ષં સં હં
ળં ક્ષં સ્વાહા । ઇતિ દિગ્બન્ધઃ ।
ૐ નમો ભગવતે આઞ્જનેયાય મહાબલાય હું ફટ્ ફે ફે ફે ફે ફે ફે સ્વાહા ।
ૐ નમો ભગવતે શ્રીવીરહનૂમતે પ્રબલપરાક્રમાય આક્રાન્તદિઙ્મણ્ડલાય
શોભિતાનનાય ધવલીકૃતવજ્રદેહાય જગચ્ચિન્તકાય રુદ્રાવતારાય
લઙ્કાપુરીદાહનાય ઉદધિલઙ્ઘનાય સેતુબન્ધનાય દશકણ્ઠશિરઃક્રાન્તાય
સીતાશ્વાસનાય અનન્તકોટિબ્રહ્માણ્ડનાયકાય મહાબલાય વાયુપુત્રાય
અઞ્જનાદેવીગર્ભસમ્ભૂતાય શ્રીરામલક્ષ્મણાનન્દકરાય કપિસૈન્યપ્રિયકરાય
સુગ્રીવસહાયકારણકાર્યસાધકાય પર્વતોત્પાટનાય કુમારબ્રહ્મચારિણે
ગમ્ભીરશબ્દોદયાય ॥

(શ્રીરામચન્દ્રદૂતાય આઞ્જનેયાય વાયુપુત્રાય મહાબલાય સીતાદુઃખ-
નિવારણાય લઙ્કાદહનકારણાય મહાબલપ્રચણ્ડાય કોલાહલસકલ-
બ્રહ્માણ્ડવિશ્વરૂપાય સપ્તસમુદ્રનિરાલમ્બિતાય પિઙ્ગલનયનાય
અમિતવિક્રમાય સૂર્યબિમ્બફલસેવનાય દૃષ્ટિનિરાલઙ્કૃતાય
અઙ્ગદલક્ષ્મણમહાકપિસૈન્યપ્રાણનિર્વાહકાય દશકણ્ઠવિધ્વંસનાય
રામેષ્ટાય ફલ્ગુનસખાય સીતાસમેતરામચન્દ્રપ્રસાદકાય સ્વાહા ।)

ૐ હ્રીં ક્લીં સર્વદુષ્ટગ્રહનિવારણાય સર્વરોગજ્વરોચ્ચાટનાય
શાકિની-ડાકિનીવિધ્વંસનાય ૐ હ્રીં ક્લીં હું ફટ્ ફે ફે સ્વાહા ।
ૐ નમો ભગવતે શ્રીવીરહનૂમતે
સર્વભૂતજ્વરૈકાહિક-દ્વ્યાહિક-ત્ર્યાહિક-ચાતુર્થિક-સન્તતવિષમજ્વર-
ગુપ્તજ્વર-શીતજ્વર-મહેશ્વરજ્વર-વૈષ્ણવજ્વરાદિસર્વજ્વરાન્
છિન્દિ છિન્દિ ભિન્દિ ભિન્દિ ।
યક્ષરાક્ષસબ્રહ્મરાક્ષસભૂતપ્રેતપિશાચાનુચ્ચાટયોચ્ચાટય ॥

ૐ શ્રીં હ્રીં હું ફટ્ ફે ફે સ્વાહા ।
ૐ નમો ભગવતે શ્રીવીરહનૂમતે નમઃ ।
ૐ હ્રાં હ્રીં હ્રૂં હ્રૈં હ્રૌં હ્રઃ । આહ આહ । અસૈ અસૈ એહિ એહિ

ૐ ૐ હૌં હૌં હું હું ફટ્ ફે ફે સ્વાહા ।
ૐ નમો ભગવતે પવનાત્મજાય ડાકિની-શાકિની-મોહિનીનિઃશેષ-
નિરસનાય સર્વવિષં નિર્વિષં કુરુ કારય કારય હું ફટ્ ફે ફે સ્વાહા ।
ૐ નમો ભગવતે શ્રીવીરહનુમતે
સિંહશરભ-શાર્દૂલ-ગણ્ડભેરુણ્ડ-પુરુષમૃગાણાં
ઓશાતિ નિરસનાય । ???
ક્રમનિરસનક્રમણં કુરુ । સર્વરોગાન્નિવારય નિવારય આક્રોશય આક્રોશય
શત્રૂન્માદભયં છિન્દિ છિન્દિ । છાદય છાદય । મારય મારય ।
શોષય શોષય । મોહય મોહય । જ્વાલય જ્વાલય । પ્રહારય પ્રહારય ।
મમ સર્વરોગાન્ છેદય છેદય । ૐ હ્રીં હું ફટ્ ફે ફે સ્વાહા ।
ૐ નમો ભગવતે શ્રીવીરહનુમતે સર્વરોગદુષ્ટગ્રહાનુચ્ચાટય ઉચ્ચાટય
પરબલાનિ ક્ષોભય ક્ષોભય ।
મમ સર્વકાર્યાણિ સાધય સાધય । શ‍ૃઙ્ખલાબન્ધનં મોક્ષય મોક્ષય ।
કારાગૃહાદિભ્યો મોચય મોચય । શિરઃશૂલ-કર્ણશૂલાક્ષિશૂલ-કુક્ષિશૂલ-
પાર્શ્વશૂલાદિ મહારોગાન્ નિવારય નિવારય । નાગપાશાનન્ત-વાસુકિ-
તક્ષક-કર્કોટક-કાલગુલિયકપદ્મ-મહાપદ્મ-કુમુદાચલચર-રાત્રિચર-
દિવાચરાદિસર્વવિષં નિર્વિષં કુરુ નિર્વિષં કુરુ । સર્વરોગનિવારણં કુરુ ।
સર્વરાજસભામુખસ્તમ્ભનં કુરુ । સ્ત્રીજનસ્તમ્ભનં કુરુ સ્તમ્ભનં કુરુ ।
સર્વભયચોરભયાગ્નિભયપ્રશમનં કુરુ પ્રશમનં કુરુ ।
સર્વનરયન્ત્ર-પરતન્ત્ર-પરવિદ્યાં છેદય છેદય । સન્ત્રાસય સન્ત્રાસય ।
મમ સર્વવિદ્યાં પ્રકટય પ્રકટય । પોષય પોષય ।
સર્વારિષ્ટં શમય શમય સર્વશત્રૂન્ સંહારય સંહારય ।
સર્વરોગપિશાચબાધાં નિવારય નિવારય ।
ૐ હ્રાં હ્રીં હ્રૂં હ્રૈં ફટ્ ફે ફે સ્વાહા ।
ૐ નમો ભગવતે શ્રીવીરહનૂમતે વરપ્રસાદકાય સર્વાભીષ્ટપ્રદાય
સકલસમ્પત્કરાય મહારક્ષકાય ૐ જં જં જં જં જં જં
જગજ્જીવનાય હું ફટ્ ફે ફે ફે સ્વાહા ।

ય ઇદં કવચં નિત્યં પ્રપઠેત્ પ્રયતો નરઃ ।
એકવારં પઠેન્નિત્યં સર્વશત્રુવિનાશનમ્ ।
દ્વિવારં તુ પઠેન્નિત્યં પુત્રપૌત્રપ્રવર્ધનમ્ ॥

ત્રિવારં યઃ પઠેન્નિત્યં સર્વસમ્પત્કરં શુભમ્ ।

ચતુર્વારં પઠેન્નિત્યં સર્વરોગનિવારણમ્ ॥

પઞ્ચવારં પઠેન્નિત્યં સર્વશત્રુવશીકરમ્ ।
ષડ્વારં તુ પઠેન્નિત્યં સર્વદેવવશીકરમ્ ॥

સપ્તવારં પઠેન્નિત્યં સર્વસૌભાગ્યદાયકમ્ ।
અષ્ટવારં પઠેન્નિત્યમિષ્ટકામાર્થસિદ્ધિદમ્ ॥

નવવારં સપ્તકેન સર્વરાજ્યવશીકરમ્ ।
દશવારં ચ પ્રજપેત્ ત્રૈલોક્યજ્ઞાનદર્શનમ્ ॥

એકાદશં જપિત્વા તુ સર્વસિદ્ધિકરં નૃણામ્ ।
ત્રિસપ્તનવવારં ચ રાજભોગં ચ સમ્ભવેત્ ॥

દ્વિસપ્તદશવારં તુ ત્રૈલોક્યજ્ઞાનદર્શનમ્ ।
દશૈકવારં પઠનાદિદં મન્ત્રં ત્રિસપ્તકમ્ ॥

સ્વજનૈસ્તુ સમાયુક્તસ્ત્રૈલોક્યવિજયી ભવેત્ ।
કવચસ્મરણાદેવ મહાફલમવાપ્નુયાત્ ।

ચન્દ્રાભં ચરણારવિન્દયુગલં કૌપીનમૌઞ્જીધરં
નાભ્યાં વૈ કટિસૂત્રયુક્તવસનં યજ્ઞોપવીતં શુભમ્ ।
હસ્તાભ્યામવલમ્બિતાઞ્જલિપુટં હારાવલિં કુણ્ડલં
બિભ્રદ્દીર્ઘશિખાપ્રસન્નવદનં વન્દ્યાઞ્જનેયં ભજે ॥

(સુદર્શનસંહિતાતઃ ।)

The kavacha has variations in print. This is a second version in comparison with other text with similar title.

From Hanumatstutimanjari, Mahaperiaval Publication
Proofread by PSA Easwaran psaeaswaran at gmail

*shrIpa nchamukhivIrahanUmatkavacham*
pdf was typeset on July 13, 2023

Please send corrections to *sanskrit@cheerful.com*